# योगोपनिषदनुसारं नाडीविज्ञानम् – एकमध्ययनम्
## Yogopaniṣadanusāraṃ nāḍīvijñānam – ekamadhyayanam

**Alok Bepari**
Research Scholar, Dept. of Sankhya-Yoga
National Sanskrit University, Tirupati, Andhra Pradesh, India
Email: alokbalok197@gmail.com

**Abstract:** 'नाडीविज्ञानम्' नाम नाडीसम्पर्कितविज्ञानम्, 'नड् णिच् इन् ङीष्' इति प्रक्रियात्वात् 'नाडी' पदं निष्पन्नञ्जायते। मानवशरीरेषु प्राणवायुप्रवाहमार्गोऽस्ति नाडी, पुनश्च सर्वेषां जीवानामाधारमात्रात्मशक्तेस्सोपानमिति। अस्मदीयभोगायतनेषु द्विसप्ततिसहस्त्रनाड्यो विद्यन्ते, तासु द्विसप्तति नाड्यः प्रमुखाः सन्ति। पुनश्च इडा पिङ्गला सुषुम्ना गान्धारी हस्तिजिह्वा पूषा यशस्विनी अलम्बुसा विश्वोदरी कुहूः पयस्विनी सरस्वती चेति प्रधानतमाः सन्ति। आवैदिककालादिदानीन्तनकालावधिः चिकित्साव्यवस्थायाम् उर्युक्तनाडीनां विशेषभूमिका वर्तते। अतएव रोगनिरूपण-लक्षण-निदानादिकार्येषु नाडीविज्ञानस्योपयोगो दरीदृश्यते। सर्वान्तिमे एवं वक्तुं शक्यतेऽस्मदीयजीवनेषु नाडी अन्यतमा प्रधानाऽस्ति, अतएव नाडीविज्ञानं यथासम्भवं ज्ञातव्यमिति मामकोऽभिप्रायः।

**Keywords:** नाडी, सुषुम्ना, इडा, पिङ्गला, ब्रह्मरन्ध्रः, सरस्वती, योगोपनिषद् च।

**प्राक्कथनम्--**

ऋषिभिर्मुनिभिश्च स्वीयज्ञानमाधारीकृत्य नार्वाचीनकालेषु प्राणशक्तिजागरणं कृतमिति, परिणामवशाद्दषिमुन्यादिसाधका उत्कृष्टचेतनासम्पन्नाः आसन्। प्राणवायुमतिरिच्य जीवा जीवितुं न शक्नुवन्ति, अतएव यावत्कालावधिरिन्द्रियायतनेषु प्राणवायुर्प्रवहति तावत्कालान्तं जीवाः निखिलजगत्यस्मिन् विचरन्ति। प्राणोऽयमस्मदीयोर्जारूपोऽस्ति। मानवशरीरेषु प्राणमिमं सञ्चालयितुं तन्त्रजालानि नाडीचक्राणि वा विद्यन्ते।

नाडीविज्ञानमाधारीकृत्य वेदेषूपनिषत्सु दर्शनशास्त्रेषु पुराणेषु ज्योतिषशास्त्रेषु सुश्रुतसंहितायां चरकसंहितायां चादिशास्त्रेषु ग्रन्थेषु भूरिशः तथ्यानि विद्यन्ते। परन्त्वत्र केवलमात्रं योगोपनिषद आधारीकृत्य प्रस्तूयते शोधलेखोऽयम्। अधुना योगोपनिषत्पदस्य कोऽर्थ? इति प्रश्नो मनसि समागतो जायते। तत्र वयं सर्वे जानीमो ब्रह्मविद्या भवति उपनिषदां मुख्यविषयः, तत्र ब्रह्मविद्यां प्रतिपादयन्तो योगतत्त्वानि उपस्थापितवन्तः उपनिषद्वक्तारः। परन्तु संस्कृतवाङ्मयेषु काश्चिदुपनिषदस्सन्ति, यत्र साक्षाद्रूपेण पातञ्जलयोगदर्शनस्य सिद्धान्तास्तथा च योगतत्त्वानि विद्यन्ते; एकत्रितभावेन तैव उपनिषदो योगोपनिषदिति नाम्ना प्रसिद्ध्यतेऽखिलजगत्यस्मिन्।

**नाडीशब्दार्थः –**

'नड्'-धातोरुत्तरात् णिचि इनि च प्रत्ययसंयोगत्वात् 'नाडि', तत्पश्चात्स्त्रीत्वार्थे "कृदिकारादक्तिनः" इति सूत्रेण ङीषि प्रत्यये 'नाडी' इति पदन्निष्पन्नञ्जायते। यस्यार्थस्तावन्नालमिति। अतएव मानवशरीरेषु प्राणवायुप्रवाहमार्गोऽस्ति नाडी। अखिलशास्त्रेषु 'नाडी' इत्यस्य विविधाः पर्यायवाचिनश्शब्दास्समुपलभ्यन्ते, यथा –

"स्नायुर्नाडी तो हंसी धमनी धरणी धरा।
तन्तुकी जीवतज्ञा शब्दाः पर्यायवाचकाः"[1]॥

देहाङ्गशोधका प्राण-रस-रक्तधारका इयन्नाडी, पुनश्च सर्वेषां जीवानामाधारमात्रात्म-शक्तेस्सोपानमिति।

**योगोपनिषदनुसारं नाडीनामुत्पत्तिस्थलम्—**

मानवशरीरं षण्णवत्यङ्गुलात्मकं स्यात्, तत्र गुदाप्रदेशाद्यङ्गुलोर्ध्वं तथा च मेढ्राद्यङ्गुलाधस्स्थितस्थानमेव मानवभोगायतनस्य मध्यस्थलं केन्द्रस्थलं वेति सूच्यते, पुनश्च तत्तु मूलाधारो नाम्नाऽपि निगद्यते। मूलाधारादस्मात् नवाङ्गुलोर्ध्वप्रदेशे कन्दस्थानं विद्यते। स्थानमिदं चतुरङ्गुलमायामविस्तारं विशिष्टं तथा च कुक्कुटाण्डसमाकारमस्ति। अस्मात्कन्दस्थलात्सर्वा नाड्य उत्पद्यन्ते। तदुक्तञ्च—

"तिष्ठन्ति परितस्तस्या नाड्यो हि मुनिपुङ्गव।
द्विसप्ततिसहस्राणि तासां मुख्याश्चतुर्दश"[2] ॥

**योगोपनिषत्सु नाडीप्रभेदः** –

नाडीसंख्यामाश्रित्योपनिषत्सु उपनिषद्वक्तारो भूरिशस्सिद्धान्तान् उपस्थापितवन्तः। अस्मदीयभोगायतनेषु द्विसप्ततिसहस्रनाड्यो विद्यन्ते, तासु द्विसप्तति नाड्यः प्रमुखाः सन्ति। पुनश्च द्विसप्ततिनाडीषु दश प्रधानतमाः, तास्तावत् –

"इडा च पिङ्गला चैव सुषुम्ना च तृतीयगा ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी।
अलम्बुसा कुहूश्चैव शङ्खिनी दशमी स्मृता"[3] ॥

ध्यानबिन्दूपनिषदि[4], त्रिशिखिब्राह्मणोपनिषदि, योगचूडामण्युपनिषदि[5] च अनुरूपसिद्धान्ताः समुपलभ्यन्ते। इतोऽप्यथर्वामुनिना शाण्डिल्योपनिषदि तथा च महायोगीन्द्रदत्तात्रेयमुनिना जाबालदर्शनोपनिषदि द्विसप्ततिनाडीषु चतुर्दश प्रधानतमास्स्पष्टीकृताः। प्रसङ्गेऽस्मिन्नीक्ष्यते यत् –

"सुषुम्ना पिङ्गला तद्वदिडा चैव सरस्वती।
पूषा च वरुणा चैव हस्तिजिह्वा यशस्विनी॥
अलम्बुसा कुहूश्चैव विश्वोदरी पयस्विनी।
शङ्खिनी चैव गान्धारा इति मुख्याश्चतुर्दश"[6]॥

कृष्णयजुर्वेदीयवराहोपनिषदि इडा पिङ्गला सुषुम्ना गान्धारी हस्तिजिह्वा पूषा यशस्विनी अलम्बुसा विश्वोदरी कुहूः पयस्विनी सरस्वती चेति द्वादश नाड्योऽवलोक्यन्ते।

**नाडीविवरणम् –**

वेदेषूपनिषत्सु दर्शनशास्त्रेषु पुराणेषु ज्योतिषशास्त्रेषु चेत्यादिषु शास्त्रेषु नाडीनां विवरणं सम्यक्तया समुपलभ्यते, अत्र योगोपनिषद्दिशा नाडीनां परिचयो यथामति मया आलोच्यते, तद्यथ—

**(क) सुषुम्नानाडी** –

नाडीषु सुषुम्ना प्रमुखा, पुनश्च 'ब्रह्मनाडी' इति नाम्नाऽप्यभिधीयते। इडापिङ्गलयोः मध्यप्रदेशे सुषुम्ना स्थिता – 'सुषुम्ना मध्यदेशे'[7]। पुनश्च मूलाधाराद्ब्रह्मरन्ध्रान्तं विस्तृताऽस्ति नाडीयम्। अतएव पायुप्रदेशस्थितवीणादण्डमाश्रित्य मूर्धास्थितब्रह्मरन्ध्रे प्रविशति सुषुम्नानाडी। इयं सुषुम्नानाडी स्पष्टता, सूक्ष्मता, वैष्णवीस्वरूपा, विश्वधारिणी, मोक्षप्रदायिनी चेति विशेषणविशिष्टा भवति इतोऽपि 'सरस्वतीनदीसदृशी' श्रीनिवासभट्टेन प्रपञ्चिता। तथा च ब्रूते—

"तत्र सुषुम्ना विश्वधारिणी मोक्षमार्गेति चाचक्षते।
गुदस्य पृष्ठभागे वीणादण्डाश्रित्य मूर्धपर्यन्तं
ब्रह्मरन्ध्रे विज्ञेया व्यक्ता सूक्ष्मा वैष्णवी भवति"[8]।

**(ख) इडानाडी** –

सुषुम्नानाड्यास्सव्यदिशि स्थिताऽस्ति इडानाडी, उक्तञ्च— "सुषुम्नायाः सव्यभागे इडा तिष्ठति"[9]। अतएव वामकन्दात्समुत्थाय वामनासिकावधिः प्रसारणशीला इयमिडानाडी। प्रसङ्गेऽस्मिन् दरीदृश्यते— "इडा समुत्थिता कन्दाद् वामनासापुटावधिः"[10]। तमस्स्वरूपा गङ्गानदीसदृशी च इडानाडी, अत्र सर्वदा चन्द्रदेवो विचरतीत्यस्मात्कारणात् 'चन्द्रनाडी' इति नाम्नापि निगद्यते

**(ग) पिङ्गलानाडी** –

'सूर्यनाडी' इति नाम्नाऽपि सूच्यते। सुषुम्नाया अपसव्यप्रदेशात् अथवा दक्षिणकन्दात् उत्थाय दक्षिणनासिकां यावद्विसृतेयन्नाडी – 'पिङ्गला चोत्थिता तस्मात् दक्षनासापुटावधिः'[11]। अत्र सूर्यस्सञ्चरति, इतोऽपि यमुनानदीसमा रजःप्रकृतिश्च भवति पिङ्गलानाडी। तदुक्तञ्च अथर्वामुनिना– "पिङ्गलायां रविः। रजोरूपो रविः"[12]।

**(घ) सरस्वतीनाडी** –

सुषुम्नानाड्याः पृष्ठदिशि सरस्वतीनाडी विद्यते, पुनश्च सुषुम्नायाः पूर्वभागाज्जिह्वाया ऊर्ध्वान्तं सम्प्रसारणशीला अस्ति। भाषितञ्च –

"सुषुम्नापृष्ठपार्श्वयोः सरस्वतीकुहू भवतः। जिह्वाया ऊर्ध्वान्तं सरस्वती भवति"[13]।

**(ङ) कुहूनाडी –**

सुषुम्नानाड्याः पूर्वप्रदेशे कुहूनाडी स्थिता तथा च नाडीयं सुषुम्नायाः पूर्वभागाल्लिङ्गक्षेत्रं

यावत्प्रसारणशीलाऽस्ति। प्रपञ्चितञ्च – "सुषुम्नापृष्ठपार्श्वयोः सरस्वतीकुहू भवतः। सुषुम्नापूर्वभागे मेढ्रान्तं कुहूर्भवति"[14]।

**(च) गान्धारीनाडी** –

गान्धारीनाडी इडापश्चात्प्रदेशे वर्तते, तत्रतोऽर्थादिडानाड्याः पृष्ठप्रदेशात्प्रारभ्य वामनेत्रावधिर्विसृतेयं गान्धारीनाडी। तदुक्तञ्च – "इडापृष्ठभागात्सव्यनेत्रगा गान्धारी भवति"[15]।

**(छ) हस्तिजिह्वानाडी –**

इडासम्मुखप्रदेशे पूर्वभागे वा विद्यमाना तथा च तत्प्रदेशादारभ्य वामपादाङ्गुष्ठपर्यन्ता विसृताऽस्ति हस्तिजिह्वानाडी । तथा चाऽऽह – "गान्धारा हस्तिजिह्वा च इडायाः पृष्ठपूर्वयोः। हस्तिजिह्वा तथा सव्यपादाङ्गुष्ठान्तमिष्यते"[16]।

**(ज) यशस्विनीनाडी** –

पिङ्गलायाः पूर्वप्रदेशे सम्मुखप्रदेशे वा नाडीयमवस्थिता, पुनश्च तस्मात्स्थानात्प्रारभ्य सव्यपादाङ्गुष्ठान्तं विस्तृताऽस्ति यशस्विनीनाडी। निगदितञ्च – "यशस्विनी च वामस्य पादाङ्गुष्ठान्तमिष्यते"[17]। परन्तु योगचूडामण्युपनिषदनुसारं वामकर्णे स्थिता[18] तथा च शाण्डिल्योपनिषदनुसारं गान्धारीनाडी सरस्वतीनाडी चेत्युभयमध्यप्रदेशे यशस्विनीनाडी विद्यते[19] इति।

**(झ) पूषानाडी** –

पूषानाडी पिङ्गलायाः पश्चात्प्रदेशे विद्यते तथा च सूर्यनाड्याः पृष्ठप्रदेशादारभ्य दक्षिणलोचनान्तं सम्प्रसारणशीलाऽस्ति। तथा चोक्तम् – "पिङ्गलायाः पृष्ठतो याम्यनेत्रान्तं पूषा भवति"[20] ।

**(ञ) पयस्विनीनाडी –**

पूषा-सरस्वतीनाड्योर्मध्यप्रदेशे अवस्थिता अस्तीयं नाडी, प्रसङ्गेऽस्मिन् ब्रूते – "पूषायाश्च सरस्वत्या मध्ये प्रोक्ता पयस्विनीनाडी"[21]।

**(ट) शङ्खिनीनाडी** –

इयं नाडी गान्धारी-सरस्वतीनाड्योः मध्यप्रदेशे सुप्रतिष्ठिता, पुनश्च तस्मात्स्थानात्प्रारभ्य वामकर्णावधिर्विसृताऽस्ति। पञ्चितञ्च – "गान्धारायाः सरस्वत्याः मध्ये प्रोक्ता च शङ्खिनी। शङ्खिनी नाम या नाडी सव्यकर्णान्तमिष्यते"[22]।

**(ठ) कौशिकीनाडी** –

कन्दस्याऽधस्तात्पादाङ्गुष्ठं यावत्कौशिकीनाडी विस्तृता। तदुक्तञ्च त्रिशिखिब्राह्मणोपनिषदि – "पादाङ्गुष्ठावधिः कन्दादधोयाता च कौशिकी"[23]।

**(ड) वरुणीनाडी** –

यशस्विनीनाडी कुहूनाडी चेत्युभयमध्यप्रदेशस्था भवति वरुणीनाडी, इतोऽपि कुण्डलिन्याः अधःप्रदेशे ऊर्ध्वप्रदेशे च विद्यते। भाषितञ्च– "यशस्विनी-कुहूमध्ये वरुणी प्रतिष्ठिता। कुण्डलिन्या

अधश्चोर्ध्वं वारुणी सर्वगामिनी भवति”[24]।

**(ढ) अलम्बुसानाडी** –

कन्दमध्यप्रदेशे अलम्बुसानाडी विद्यते। गुदामूलात्प्रारभ्य तदीयोपरि अधश्च विचरणशीला इयन्नाडी। उक्तञ्च – “कन्दमध्येऽलम्बुसा भवति। पायुमूलादधोर्ध्वगाऽलम्बुसा भवति”[25]।

**(ण) विश्वोदरीनाडी –**

कुहूनाडी-हस्तिजिह्वानाड्योः मध्यप्रदेशस्था भवति विश्वोदरीनाडी। उक्तञ्च– “कुहोश्चहस्तिजिह्वाया मध्ये विश्वोदरी स्थिता”[26]। इति।

जाबालदर्शनोपनिषदि नाड्यधिष्ठितदेवतानां नामानि अपि दरीदृश्यन्ते, यथा – सुषुम्नाया महादेवशिवः, इडायाश्श्रीहरिः, पिङ्गलायाः पितामहब्रह्मा, सरस्वत्या विराण्मुनिः, पूषायाः पूषानामसमन्वितादित्यदेवः, वरुणाया वायुदेवः, हस्तिजिह्वाया वरुणदेवः, यशस्विन्या भगवान्भास्करः, अलम्बुसाया जलस्वरूपवरुणदेवः, कुहोः क्षुद्देवता, गान्धार्याश्चन्द्रदेवः, शङ्खिन्याश्चन्द्रदेवः, पयस्विन्याः प्रजापतिः, विश्वोदरीनीड्याः अग्निदेवश्चेति भवति अधिदेवता। इडानाड्यां चन्द्रः पिङ्गलायाञ्च सूर्यो नित्यं विचरति। पिङ्गलानाडीतः इडानाडीं प्रति यदा प्राणस्संक्रमति तदा उत्तरायणं भवति, पुनश्चेडानाडीतः पिङ्गलानाडीं प्रति यदा प्राणस्संक्रमति तदा दक्षिणायणं भवति। परन्तु यदा प्राण इडापिङ्गलयोस्सन्धिस्थले समागतो भवति तदाऽमावस्या भवति मानवशरीरेषु।

एतासु सर्वासु नाडीषु प्राणापानसमानोदानव्याना नागकूर्मकृकरदेवदत्तधनञ्जया एते दश वायवो विचरन्ति। तेषु प्राणापानौ प्रधानतमौ, तत्र प्राणवायुः आस्यनासिकाकण्ठनाभिपादाङ्गुष्ठेषु सञ्चरति। गुदमेढ्रोरुजानुषु अपानवायुः, श्रोत्राक्षिकटिगुल्फघ्राणगलेषु व्यानः, समानस्सर्वगात्रेषु, सर्वसन्धिस्थलेषु उदानवायुश्च परिभ्रमति। नागादिपञ्चवायवोऽस्थ्यादिषु विचरन्तीति। तत्र निःश्वासोच्छ्वासकासाः प्राणस्य, विण्मुत्रादिविसर्जनमपानस्य, सर्वसामीप्यकरणं समानस्य, ऊर्ध्वगमनमुदानस्य, ध्वनिव्यञ्जकं व्यानस्य, उद्गारणन्नागस्य, सौन्दर्यसम्पादनं धनञ्जयस्य, निमीलनं कूर्मस्य, क्षुधा कृकरस्य, तन्द्रालस्यं देवत्तस्य च कार्यमिति।

**योगोपनिषत्सु नाडीशोधनप्रक्रिया –**

सुस्थतापूर्वकं जीवनं परिपालयितुमिच्छति तथा च मोहमयसंसारचक्रान्मुक्तिमीप्सति चेन्नाडीशुद्धिरवश्यमेव कर्तव्या, एतत्तु कथं सम्भवति? विषयेऽस्मिन्नीक्ष्यते– “विधिवत्प्राणसंयामैर्नाडीचक्रे विशोधते”[27]। अतएव विधिवत्प्राणायामस्याऽनुष्ठानं क्रियते चेदवश्यमेव नाडीशुद्धिस्स्यात्। प्राणायामस्याऽस्य विधिर्भवति—

“प्राणं प्रागिडया पिबेन्नियमितं भूयोऽन्यणा रेचयेत्पीत्वा पिङ्गलया समीरणमथो बद्धा त्यजेद्वामया।
सूर्याचन्द्रमसोरनेन विधिनाऽभ्यासं सदा तन्वतां शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः”[28]॥

अतस्सर्वादौ इडानाड्याऽनिलमाकृष्य कुम्भकक्रियामनुष्ठाय पिङ्गलानाड्या समीरमुत्सर्जयेत्। तत्पश्चात्पुनः पिङ्गलानाड्या प्राणं पूरयित्वा कुम्भकप्राणायाममनुशील्य इडानाड्या रेचकक्रियां

कुर्यात्। इत्थम्प्रकारेण सूर्यचन्द्रनाडीभ्याम्प्रत्यहमनुशीलयति चेदवश्यमेव नाडीशुद्धिस्स्यात्। अनुरूपप्रक्रिया दरीदृश्यते जाबालदर्शनोपनिषदि।

पुनश्च योगचूडामण्युपनिषदनुसारं महामुद्रया नाडीजालानि परिशुन्धितुं शक्यन्ते। उक्तञ्च –

"शोधनं नाडिजालस्य चालनं चन्द्रसूर्ययोः।
रसानां शोषणं चैव महामुद्राभिधीयते"[29]॥

इतोऽपि षोडशमात्रापूर्वकमिडयाऽनिलमाकृष्य चतुःषष्टिमात्रान्तं कुम्भकक्रियां कुर्यात्। तत्पश्चात् द्वात्रिंशन्मात्रासहितं पिङ्गलया समीरमुत्सर्जयेत्। पुनश्च विपरीतप्रक्रियया कार्यमेतत्कुर्वीत। प्रातः मध्याह्ने सायमर्धरात्रे च चतुर्वारं समभ्यसेत, शनैरशीतिपर्यन्तमनुशीलयेत्। इत्थम्प्रकारेण मासत्रयमनुशीलयति चेन्नाडीशुद्धिर्भवतीति योगतत्त्वोपनिषदनुसारम्।

**उपसंहारः—**

आवैदिककालादिदानीन्तनकालावधिः चिकित्साव्यवस्थायां नाडीविज्ञानस्य भूमिका अनुपेक्षणीया। साम्प्रतं व्याधिं निर्णेतुमुच्चावचाधुनिकोपकरणानि सन्ति, परन्तु प्राचीनकाले केवलमात्रं नाडी आसीत् रुजान्निर्णेतुं सोपानमिति। अतएव रोगनिरूपण-लक्षण-निदानादिकार्येषु नाडीविज्ञानस्योपयोगो दरीदृश्यते। सर्वान्तिमे एवं वक्तुं शक्यतेऽस्मदीयजीवनेषु नाडी अन्यतमा प्रधानाऽस्ति।

## Endnotes

1. योगरत्नाकर, १/१६
2. तदेव, ४/६
3. योगकुण्डल्योपनिषत्, १६-१७
4. ध्यानबिन्दूपनिषदि, ५२-५३
5. योगचूडामण्युपनिषदि, १६-१७
6. जाबालदर्शनोपनिषत्, ४/७-८
7. योगचूडामण्युपनिषत्, १९
8. शाण्डिल्योपनिषत्, ४/१०
9. तदेव, ४/११
10. त्रिशिखिब्राह्मणोपनिषत्, २/७०९
11. तदेव, २/७१
12. शाण्डिल्योपनिषत्, ४/११
13. तदेव,, ४/११
14. तदेव,, ४/११
15. तदेव,, ४/११

16. जाबालदर्शनोपनिषत् , ४/१४,१७
17. तदेव, ४/१९
18. योगचूडामण्युपनिषत्, २०
19. शाण्डिल्योपनिषत्, ४/११
20. तदेव, ४/११
21. जाबालदर्शनोपनिषत् , ४/१६
22. तदेव, ४/१७,२२
23. त्रिशिखिब्राह्मणोपनिषत्, ७४
24. शाण्डिल्योपनिषत्, ४/११
25. तदेव, ४/११
26. जाबालदर्शनोपनिषत् , ४/१५
27. शाण्डिल्योपनिषत्, ७/९
28. तदेव, ७/१
29. योगचूडामण्युपनिषत्, ४२

## Bibliography


- *उपनिषत्सञ्चयनम्.* सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.1, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, 2015।
- *उपनिषत्सञ्चयनम्.* सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.2, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, 2015।
- *उपनिषत्सञ्चयनम्.* सम्पा. आचार्य केशवलाल वी. शास्त्री, भाग.3, दिल्ली: चौखम्वा संस्कृत प्रतिष्ठान, 2015।
- *योग उपनिषदः.* सम्पा. सुभाष विद्यालंकार, भाग.1, दिल्ली: प्रतिभा प्रकाशन, 2018।
- *योग उपनिषदः.* सम्पा. सुभाष विद्यालंकार, भाग.2, दिल्ली: प्रतिभा प्रकाशन, 2018।